निरुत्तरः। आहूतप्रपलायी च हीनः पञ्चविधः स्मृतः" मिता० नारदः तल्लक्षणं यथा "लेख्यं च साक्षिणश्चैव क्रिया ज्ञेया मनीषिभिः। तां क्रियां द्वेष्टि यो मोहात् क्रियाद्वेषी स उच्यते" वीरमि० कात्या०।

**क्रियापाद** पु० क्रिया विवादसाधनं पादइव। चतुष्पाद्व्यवहारे साध्यार्थसाधनरूपे तृतीये पादे। "१पूर्व्वपक्षः स्मृतः पादो २द्वितीयश्चोत्तरः स्मृतः। ३क्रियापादस्तथान्यश्च तृतीयो ४निर्णयस्ततः" वृह०। तस्य व्यवहारपादत्वं तद्विशेषादि वीरमित्रोदये निर्णीतं यथा

"अथ क्रियापादः। तत्र तदुपयोगिप्रत्याकलितं प्रथमं निरूप्यते। विज्ञानयोगिना तस्य व्यवहारपादत्वानभ्युपगमेऽपि क्रियादानोपयोगित्वाभ्युपगमात्। अन्यैस्तु व्यवहारपादत्वस्यैव स्वीकारात् क्रियापादप्रागभावस्तूभयसम्मतः। प्रत्याकलितन्नाम भाषोत्तरयोरर्थिप्रत्यर्थिभ्यां लिखितयोः क्रियोपन्यसनमनयोर्मध्ये कस्य स्यात्का चास्मिन् वादे क्रिया स्वाधीनवादी वानयोर्मध्ये क इत्यादिः सभ्यप्राड्विवाकस्य सभापतेः सभ्यस्य प्राड्विवाकस्य वा परामर्श उच्यते। तथा च वृहस्पतिः "ये तु तिष्ठन्ति करणे तेषां सभ्यैर्विभावना। कलयित्वोत्तरं सभ्यैर्द्दातव्यैकस्य वादिनः"। करणे धर्माधिकरणे ये तिष्ठन्ति वादिनः प्रतिवादिनश्च तेषामुत्तरं मिथ्यादिचतुर्भेदं कलयित्वा विचार्य्य एतदुत्तरे कस्य क्रियोपन्यास उचित इति निर्धार्य्य विभाव्यते साध्यमनयेति विभावना क्रियाप्रमाणमिति यावत्। एकस्य वादिनोऽर्थिप्रत्यर्थ्यन्यतरस्य सभ्यैर्दातव्या उपन्यसनीयत्वेनाज्ञापयितव्येत्यर्थः। कात्यायनोऽपि "लिखिते शोधिते सम्यक् सति निर्दोष उत्तरे। अर्थिप्रत्यर्थिनोर्वापि क्रियाकरणमिष्यते"। क्रियाकरणं क्रियोपन्यासः। पुनर्वृहस्पतिः "श्रुत्वा पूर्वोत्तरं सभ्यैर्निर्दिष्टा यस्य भावना। विभावयेत् प्रतिज्ञातं सोऽखिलं लिखितादिना"। विभाव्यते साध्यते साध्यमनयेति विभावना क्रियैव। पूर्वोत्तरं पूर्वपक्षमुत्तरञ्चेत्यर्थः। द्वन्द्वैकवद्भावः। निर्दिष्टा ब्रूहीत्युपदिष्टा। कस्मिन्नुत्तरे कस्य क्रिया क्रियारहितञ्च किमुत्तरमित्यपेक्षायामाह व्यासः "प्राङ्न्यायकारणोक्तौ तु प्रत्यर्थी निर्दिशेत् क्रियाम्। मिथ्योक्तौ पूर्ववादी तु प्रतिपत्तौ न सा भवेत्"। प्राङ्न्यायकारणोत्तरयोः प्राङ्न्याये कारणे च साधितेऽर्थिसाध्यस्य ग्रहणस्य धारणासाधकत्वाद्द्वयं साधनं प्रत्यर्थिनाऽभ्युपगमाच्चेति तत्रैव साध्यत्वाविर्भावात्तदुपन्यासकारिण एव प्रत्यर्थिनः प्रमाणोपन्यासस्तत्साधनायोचितः। अर्थिसम्बन्धविरहप्रत्यर्थिसम्बन्धयोर्द्वयोरपि तेनैव निर्णयात्। मिथ्योत्तरे तु वादिनः प्रमाणमपेक्ष्य यदि प्रतिज्ञातेऽर्थे प्रमाणाभाव एव प्रत्यर्थ्यभिमतोऽर्थिप्रतिज्ञातसाध्यहेत्वभावः सिध्यतीति तत्परिहाराय भावाभावयोर्भावस्यैव साध्यत्वौचित्याच्चार्थिन एव क्रिया। सम्प्रतिपत्तौ तु नैकस्यापि साध्यमस्तीति निरर्थकत्वात् क्रियैव नास्तीत्यर्थः। वृहस्पतिः "प्रतिज्ञां भावयेद्वादी प्रत्यर्थी कारणन्तथा। प्राग्वृत्तं वादिविजयं जयपत्रेण भावयेत्" प्रतिज्ञाम् प्रतिज्ञातार्थम्। इदञ्च परिशेषान्मिथ्योत्तरविषयम्। प्राग्वृत्तं प्राङ्न्यायं जयपत्रेणेति प्राङ्न्यायदर्शिसभ्योपलक्षणम्। मनुः "अपह्नवेऽधमर्णस्य देहीत्युक्तस्य संसदि। अभियोक्ता दिशेद्देश्यं करणं वान्यदुद्दिशेत्"। दिशति कथयति यथादृष्टमर्थमिति देशः साक्षी। मेधातिथिस्तु ऋणादिप्रयोगदेशवर्त्तिनः साक्षिणो देशशब्देन लक्ष्यन्त इत्याह। अन्यत्कारणं प्रमाणं साक्षिभिन्नं लेख्यादि। मेधातिथिना तु "करणं वा समुद्दिशेदिति" पठित्वा करणशब्दः प्रमाणसामान्यवाचकोऽपि गोवलीवर्दन्यायेन साक्षिभिन्नकरणमाचष्टे पृथगुपादानात्। कारणं वा समुद्दिशेदिति पाठेऽप्ययमेवार्थः" इत्युक्तम्।। यत्र मिथ्याप्रत्यवस्कन्दनयोः कृत्स्नपक्षव्यापिता। यथा कश्चिच्छृङ्ग्याहिकया कश्चिदभियुङ्क्ते मदीयेयङ्गौरमुकस्मिन् काले नष्टास्य गृहे दृष्टा यतः। तत्राभियुक्त उत्तरयति मिथ्यैतत्। एतत्प्रदर्शितनाशकालात् प्रागेवास्या मद्गृहेऽवस्थितत्वादिति। इदन्तावत्पक्षप्रतिक्षेपक्षमतममित्यनुत्तरत्वानर्हम्। कारणोपन्यासान्न शुद्धं मिथ्योत्तरम्। एकदेशाभ्युपगमाभावाच्चार्थिना लिखितोऽर्थ इत्यादि प्रागुक्तप्रत्यवस्कन्दनलक्षणं नास्कन्दति। साध्यभेदाय प्रतिज्ञाभेदापादकत्वाभावाच्च न पक्षैकदेशम् यत्सत्यमित्युत्तरं युगपद्व्यवहारासम्भवकृतं युगपदनुत्तरम्। तस्मात्सकारणं मिथ्योत्तरमेवेदम् अन्यतरसाधनेनापि विवादपर्यवसानात्। अत्र "मिथ्याक्रियापूर्ववादे" इति वचनात् "कारणे प्रतिवादिनीति" वचनाच्चान्यतरस्य यथारुचि क्रियोपन्यास इति भाति यद्यपि, तथापि मिथ्याक्रियेत्यादेः शुद्धमिथ्याविषयत्वेनैतद्विषयत्वाभावात् "कारणे प्रतिवादिनीति" वचनात् प्रतिवादिन एवात्र क्रिया। नचास्यापि शुद्धप्रत्यवस्कन्दनविषयत्वादेतद्विषयत्वाभावप्रसङ्गेन न कस्यापि क्रिया प्राप्नोतीति निर्णय-